श्रीगणेशाय नमः

श्रीवामनजयादित्यविरचिता

## पाणिनीयाष्टाध्यायीसूत्रवृत्तिः

# का शि का

## प्रथमोऽध्यायः

———(:o:)———

### प्रथमः पादः

वृत्तौ भाष्ये तथा धातुनामपारायणादिषु ।
विप्रकीर्णस्य तन्त्रस्य क्रियते सारसङ्ग्रहः ॥ १ ॥

[1]इष्टयुपसङ्ख्यानवती शुद्धगणा [2]विवृतगूढसूत्रार्था ।
व्युत्पन्नरूपसिद्धिर्वृत्तिरियं काशिका नाम ॥ २ ॥

व्याकरणस्य शरीरं परिनिष्ठितशास्त्र[3]कार्यमेतावत् ।
शिष्टः परिकरबन्धः क्रियतेऽस्य ग्रन्थकारेण ॥ ३ ॥

1. इष्टचा ग. 2. गूढ नास्ति ब. 3. कृत्य अ. प. मं.